# RAMAKRISHNA MISSION VIDYAMANDIRA
(Residential Autonomous College under University of Calcutta)

**M.A./M.SC. FIRST SEMESTER EXAMINATION, JANUARY 2015**

**FIRST YEAR**

**SANSKRIT**

Date : 10/01/2015

Time : 11.00 am – 3.00 pm

Paper : I

Full Marks : 100

**[Use a separate answer book for each group]**

## Group – A

1. अध:स्थेषु यथाभिलाषं प्रश्न**पञ्चकं** समाधेयम्। [5×2]

क) कवि-शब्दस्य सायणसम्मतोऽर्थ: क: ?

ख) 'विश्वे देवास:' इत्यत्र विश्व-शब्द: सर्वशब्दपर्यायो न वा ?

ग) पुरोऽनुवाक्यया याज्यानां विकल्प: समुच्चयो वा भवति ?

घ) 'घृताचीम्' इति पदं कथं निष्पन्नम् ?

ङ) 'नञ्सुभ्याम्' इति सूत्रस्य सरलार्थ: क: ? उदाहरणञ्च तत्र किं स्यात् ?

च) अनुरूपस्तृच इत्युक्ते किं बोध्यम् ?

छ) 'दोषावस्त:' इति पदस्य सायणीयोऽर्थ: समीचीनो न वा ?

ज) 'स्वधया' इति पदे या तृतीया तया किमभिप्रेयते ?

2. मन्त्रस्य व्याख्यानं कार्यम्। [5]

अश्विना यज्वरीरिषो

द्रवत्पाणी शुभस्पती।

पुरुभुजा चनस्यतम्।।

3. अधोनिर्दिष्टेषु स्वहृदयानुरूपं **द्वयो**र्विस्तरेणोत्तरं प्रदीयताम्। [2×7½]

क) विश्वामित्रनदीसंवादस्य विषयश्चारुतयोपवर्ण्यताम्।

ख) सरस्वतीति शब्दस्य व्युत्पत्तिगतोऽर्थ: क: ? वैदिकसरस्वत्या: पौराणिकसरस्वत्या: कोऽपि भेदो वर्तते न वेति विस्तरेणालोच्यताम्।

ग) 'या च का च बलकृतिरिन्द्रकर्मैव तत्' इति निरुक्तवचनं वैदिकदृष्ट्या समर्थ्यताम्।

4. अधस्तनयोर्यथाभिमतम् **एकतरस्य** सविशदमुत्तरं प्रदीयताम्। [1×10]

क) ''अथ निपाता:। उच्चावचेष्वर्थेषु निपतन्ति'- यास्कवचनस्यैतस्य सार्थक्यं सोदाहरणं साधु प्रतिपाद्यताम्।

ख) मन्त्रेषु देवतानिश्चयाय य उपाया निरुक्तग्रन्थे निर्दिष्टास्ते सोदाहरणं सम्यगालोच्यन्ताम्।

5. अध:समुद्धृतेषु **द्वयो**र्व्याख्या कार्या। [2×5]

क) पूर्वापरीभूतं भावमाख्यातेनाचष्टे

ख) इन्द्रियनित्यं वचनमौदुम्बरायण:

ग) तदेतन् नरराष्ट्रमिव

## Group – B

6. कस्यचि**देक**स्योत्तरं प्रदेयम्। [1×15]

क) शब्दशास्त्रे प्रत्याहारशब्दस्य कोऽर्थ: ? कथं वा प्रत्याहार: प्रसाध्यते ? र-प्रत्याहार: स्वीकार्यो न वा ? सर्वं निपुणमालोच्यताम्।

ख) कुत्र वा स्थानिनामन्त्यादेश: कुत्र वा सर्वादेश: स्यादिति सोपपत्ति प्रतिपाद्यताम्।

7. **<u>एकस्य</u>** सूत्रस्य व्याख्या कार्या। [1×5]

क) येन विधिस्तदन्तस्य।

ख) इको गुणवृद्धी।

8. यथेच्छं **<u>पञ्च</u>** प्रश्नाः समाधेयाः। [5×2]

क) को नाम स्थानिवद्भावः ?

ख) 'हर्य्यनुभवः' इत्यत्र यकारस्य द्वित्वं केन सूत्रेण जायते ?

ग) 'कृष्ण + ऋद्धिः' इत्यत्र संहितायां कति रूपाणि ?

घ) 'गव्यूतिः' इति पदस्य कोऽर्थः ?

ङ) 'ओयते' इत्यत्र कथं न वान्तादेशः ?

च) 'सारङ्गः, साराङ्गः' च इत्यनयोः को भेदः ?

छ) 'गवाक्षः' इत्यत्रं कथं न विकल्पेन अवङ् ?

ज) ''अर्थवदधातुरप्रत्ययः प्रातिपदिकम्'' सूत्रे अप्रत्यय इति पर्युदासस्य किं प्रयोजनम् ?

झ) ''प्रथमयोः पूर्वसवर्णः'', ''नादिचि'' इत्यनयोः सूत्रयोर्मध्ये कस्तावत् सम्पर्कः ?

ञ) शब्दनिष्पत्तये कति पक्षान् स्वीकुर्वन्ति विद्वांसः ? के च ते ?

9. ससूत्रं **<u>द्वयोः</u>** साधनप्रक्रिया प्रदर्शनीया। [2×5]

शकन्धुः, प्रौढः, विष्ण इह।

**अथवा,**

यथेच्छं **<u>द्वयोः</u>** साधनप्रक्रिया प्रदर्शनीया। [2×5]

रामाय, रामान्, रामेण।

10. सूत्रद्वयं व्याख्येयम्। [2×5]

क) अकः सवर्णे दीर्घः।

ख) निपात एकाजनाङ्।

**अथवा,**

सूत्रद्वयं व्याख्यायताम्। [2×5]

क) लशक्वतद्धिते

ख) कृत्तद्धितसमासाश्च।

——————— × ———————